## *भारतीयज्ञानपरम्पराकेन्द्रोद्घाटनस्य एकदिवसीयराष्ट्रियसङ्गोष्ठ्याश्च इतिवृत्तम्*

### भारतीयज्ञानपरम्पराकेन्द्रस्य उद्घाटनम् -

राष्ट्रियसंस्कृतविश्वविद्यालयस्य म.म.नावल्पाकंशठकोपरामानुजताताचार्यशैक्षणिकभवने भारतीयज्ञानपरम्पराकेन्द्रस्य उद्घाटनं 25.09.2025 दिनाङ्के प्रातः 10.00 वादने समभवत्। इदं केन्द्रं भारतसर्वकारस्य शिक्षामन्त्रालयस्य भारतीयज्ञानपरम्पराविभागेन प्रत्यभिज्ञातं वर्तते। एतत्केन्द्रस्य उद्घाटनं राष्ट्रियसंस्कृतविश्वविद्यालयस्य कुलाधिपतिः **श्रीमान् नीडामङ्गलं गोपालस्वामिवर्यः** अकरोत्। द्विसहस्रावधानी पद्मश्रीपुरस्कृतश्च **श्रीमान् ब्रह्मश्रीः डा.माडुगुलनागफणिशर्मवर्यः** उपस्थितः आसीत्। एवं शिक्षामन्त्रालयस्य भारतीयज्ञानपरम्पराविभागस्य राष्ट्रियसंयोजकः **आचार्यः गण्टिसूर्यनारायणमूर्तिवर्यः**, तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयस्य कुलपतिः **आचार्यः गुळ्ळपल्लि श्रीरामकृष्णमूर्तिवर्यः**, तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयस्य शैक्षणिकसंकायाध्यक्षः **आचार्यः रजनीकान्तशुक्लवर्यः**, विश्वविद्यालयस्य कुलसचिवः **श्रीमान् क.वेङ्कटनारायणराववर्यः** सर्वे कार्यक्रमसंचालनसमितेः सदस्याः, आचार्याः, अधिकारिणः, भारतीयज्ञानपरम्पराकेन्द्रस्य पर्यवेक्षकः **आचार्यः शिवरामभट्टः**, भारतीयज्ञानपरम्पराकेन्द्रस्य सहपर्यवेक्षकः **डा.कुमारः बागेवाडीमठः** इत्येते उपस्थिताः आसन्। विश्वविद्यालयस्य वेदविभागाध्यक्षः **डा.निरञ्जनमिश्रवर्यः** वेदघोषमकरोत्।













## एकदिवसीयराष्ट्रियसङ्गोष्ठ्याः उद्घाटनम् -



25.09.2025 दिनाङ्के **भारतीयज्ञानपरम्परायां नीतेः शासनस्य राजधर्मस्य च प्रासङ्गिकता** इति विषये आयोजनं कृतम् । तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयेन समायोजितायाः एकदिवसीयराष्ट्रियसङ्गोष्ठ्याः उद्घाटनकार्यक्रमस्य आरम्भः दीपप्रज्वलनवैदिकप्रार्थनासरस्वतीप्रार्थनैः समभवत् । राष्ट्रियसंस्कृतविश्वविद्यालयस्य कुलाधिपतिः श्रीमान् नीडामङ्गलं गोपालस्वामिमहोदयः राष्ट्रियसङ्गोष्ठ्याः अस्याः उद्घाटनं समकार्षीत्। राष्ट्रयसंस्कृतविश्वविद्यालयस्य कुलपतेः श्रीगुळ्ळपल्लिश्रीरामकृष्णमूर्तेः आध्यक्ष्ये, शैक्षणिकसंकायाध्यक्षस्य श्रीमतः रजनीकान्तशुक्लस्य प्रास्ताविकभाषणेन, द्विसहस्रावधानिनः पद्मश्रीपुरस्कृतस्य ब्रह्मश्रीनागफणिशर्मणः कुञ्चिकाभाषणेन, आचार्यशिवरामभट्टस्य संयोजनेन, श्रीकुमारबागेवाडिमठस्य सहसंयोजनेन च सभा समचलत् । वेदविभागाध्यक्षः डा. निरञ्जनमिश्रवर्यः वैदिकप्रार्थनामकरोत् । रा.प्रियंवदा महालक्ष्मीः च लौकिकप्रार्थनामकुरुताम् ।



भारतीयज्ञानपरम्पराकेन्द्रस्य राष्ट्रियसङ्गोष्ठ्याः च उद्घाटकत्वेन राष्ट्रियसंस्कृतविश्वविद्यालयस्य कुलाधिपतिः पद्मभूषणाद्यनेकबिरुदपुरस्कृतः भारतस्य पञ्चदशः निर्वाचनायोगस्याधिकारी विवेकानन्दशिक्षणसंस्थायाः अध्यक्षः श्रीमान् नीडामङ्गलं गोपालस्वामिमहोदयः समागमत् ।

एवमेव भारतीयज्ञानपरम्परायां नीतेः शासनस्य राजधर्मस्य च प्रासङ्गिकता इति विषये एकदिवसीयराष्ट्रियसङ्गोष्ठ्यां कुञ्चिकाभाषणार्थं विश्वविद्यालयस्य प्रार्थनाम् उररीकृत्य समागतः ब्रह्मश्रीः डा. माडुगुलनागफणिशर्ममहाशयः। महोदयस्तावत् सुप्रसिद्धद्विसहस्रावधानी भवति। अयं च १.तरुणतपस्वी, २.अवधानसहस्रफणिः, ३.मेधारत्नम्, ४.श्रीकलाप्रपूर्णः, ५.पद्मश्रीरित्यादिभिः अनेकैः पुरस्कारैः विभूषितः वर्तते ।



एवमेव विश्वविद्यालयस्य प्रार्थनाम् उररीकृत्य समागतः वाल्मीकिसंशोधनकेन्द्रस्यनिदेशकः, डा.बाबासाहेबभीमराव अम्बेडकरविश्वविद्यालयस्य कुलपतिचरः आचार्यः हनुमल्तुलजपतिरायवर्यः संगोष्ठ्याम् अधिमञ्चम् उपस्थितः आसीत् । एवमेव अस्याः सङ्गोष्ठ्याः अध्यक्षत्वेन राष्ट्रियसंस्कृतविश्वविद्यालयस्य कुलपतिः साहित्याद्यनेकशास्त्रनिष्णातः आचार्यः गुळ्ळपल्लिश्रीरामकृष्णमूर्तिमहाभागः उपस्थित आसीत् । एवमेव अस्यां सङ्गोष्ठ्यां वक्तृत्वेन समागतः भारतीयज्ञानपरम्पराविभागस्य राष्ट्रियसंयोजकः आचार्यगण्टिसूर्यनारायणमूर्तिमहाशयः उद्घाटनकार्यक्रमेऽस्मिन् उपस्थितः आसीत् । एवमेव अन्ये च ये आचार्याः तत्र कार्यक्रमे उपस्थिताः तेषां सर्वेषामपि कार्यक्रमस्य पक्षतः स्वागतम् अकरोत् कार्यक्रमस्य संचालकः शिवरामकृष्णभट्टमहोदयः ।




एवमेव अस्मिन् उद्घाटनसत्रे आचर्यहनुमन्तुलजपतिरायवर्येण लिखितम् एकं पुस्तकमपि प्रकाशितम्। पुस्तकस्य नाम - Road map implementing Indian knowledge system through an interdisciplinary approach.






तत्रादौ शैक्षणिकसंकायाध्यक्षस्य श्रीमतः **आचार्यस्य रजनीकान्तशुक्लमहोदयस्य** प्रास्ताविकभाषणमासीत् । तत्र सः अमून् विषयान् समुपास्थपयत् -

राष्ट्रियसंस्कृतविश्वविद्यालयस्य कृते भारतीयज्ञानपरम्पराकेन्द्रं लब्धमिति महतः प्रमोदस्य विषयः । भारतीयज्ञानपरम्परायाः वैभवं नवोन्मेषचिन्तनं च भवतीति धिया बहुविधोद्धेश्यानि मनसि निधाय भारतीयज्ञानपरम्पराविभागेन इदं केन्द्रं प्रत्यभिज्ञातम् । प्राचीनाधुनिकसङ्गमेन ज्ञाने चिन्तने व्यवहारे च भारतीयता सम्पद्यते

इति हेतोः विविधकार्यक्रमान् प्रकल्पान् च साधयितुं भारतीयज्ञानपरम्पराविभागः आर्थिकसाहाय्यं करोति। एकदिवसात्मिका राष्ट्रियसङ्गोष्ठी भारतीयज्ञानपरम्परामधिकृत्य विश्वविद्यालयेन समायोजिता। अद्यतने युगे यदा पर्यावरणं प्रदूषणं नैतिकहासः च सर्वत्र दृश्यते। एतेषु प्रसङ्गेषु प्राचीनाः भारतीयराजधर्मनीतयः निरन्तरमार्गदर्शिकाः भवन्ति, तासां नीतीनां पुनरवलोकनं लोकतन्त्रं बलवत्तरं कर्तुं शक्नोति। अत एव अस्यां सङ्गोष्ठ्यां नीतियुक्तशासनस्य राजधर्मसिद्धान्तानां च आधुनिकजीवने प्रासङ्गिकतायाः विषये चर्चा भविष्यति इति उदघोषणम् अकुर्वन्। तत्र केचन मुख्यविषयाः प्रास्ताविके तैरवाचिषत -

१. शासनस्य नैतिकमूलं धर्मः।
२. राजधर्मः राज्ञः कर्तव्यं शासनकर्तुः उत्तरदायित्वञ्च।
३. विधिः न्यायः नियमपालनञ्च।
४. शासकप्रशासकानां नैतिकगुणः सद्गुणश्च।
५. लोककल्याणं जनकेन्द्रितशासनम्।
६. पारदर्शिता उत्तरदायित्वं शक्तेः नैतिकनियन्त्रणञ्च।
७. अर्थस्य समीचीनोपयोगः।
८. मन्त्रिणाम् उपदेशकानां संस्थानां च भूमिका।
९. नीतिशिक्षायाः आख्यानोपाख्यानद्वारा प्रयोगे संघर्षः।
१०. पर्यावरणनीतेः संरक्षणं कर्तव्यञ्च।
११.भारतीयज्ञानपरम्परायां नीतिशास्त्रस्य दार्शनिकमूलानां च परीक्षणम्।
१२.राजत्वन्यायस्य प्रशासनस्य प्राचीनादर्शानाम् अध्ययनम्।
१३.न्यायसौहार्दलोककल्याणप्राप्तेः राजधर्मस्य भूमिका।
१४.संस्कृतशास्त्रं राजनीतिशास्त्रं न्यायशास्त्रं शासनशास्त्रपण्डितानां च साहचर्यस्य संवर्धनम्।
१५.शासनक्षेत्रे परम्परायाः आधुनिकतायाश्च सेतुनिर्माणं विदुषां योगदानस्य च प्रतिपादनम्।

अस्माकं संस्कृतवाङ्मयं समुद्रवत् अस्ति भारतीयज्ञानपरम्पराद्वारा अस्य समुद्रस्य मन्थनेन अमृतम् आयाति सम्पूर्णविश्वं तत् पिबति इति।




ततः पद्मश्रीपुरस्कृतः द्विसहस्रावधानी **डा. माडुगुलनागफणिशर्ममहोदयः** कुञ्चिकाभाषणम् अकार्षीत्। अवधानसहस्रफणिरयं भारतीयज्ञानपरम्परामुद्दिश्य एवमभणत्- “भारतीयज्ञानपरम्पराकेन्द्रमुद्घाट्यते अवधानसरस्वतीकलया चोन्मिष्यते” तथा बहुषु विषयेषु एककाले चिन्तनम् अवधानम् इति उक्त्या वामनोक्तिं स्मृतवान्। हृषीकेशे दयानन्दसरस्वत्याश्रमे कृतावधानमपि स्मृतवान्। नीत्यै राजधर्मचोदनाय प्रतिभासंचोदनाय अवधानविद्यायाः प्रसारणाय ईदृशं केन्द्रं सुतरामपेक्षितमिति अवोचत्। अवधानकलासरस्वत्याः अपि अनेन प्रसारः भवितेति आनन्दं प्रकटितवान्। स्वभावान् पद्यद्वारा सभायाम् उपस्थापितवान्। प्राचीनविद्याप्रचाराय अयं परिक्रमः बह्वावश्यकः इति स्वभावं प्रकट्यकरोत्।

अध्यक्षभाषणं कुर्वन् कुलपतिः **आचार्यः गुळ्ळपल्लिश्रीरामकृष्णमूर्तिमहाभागः** इत्थमवोचत् यत् Lord Makale अस्माकं भारतीयां गुरुकुलपद्धतिं नाशयमास । तदनन्तरं हन्टर् आयोगेन इतोपि क्षीणतां गता गुरुकुलपद्धतिः । एतादृशानां






कारणेन नियमानुगुणम् अस्माकं गुरुकुलानि आङ्ग्लप्रभावितविद्यासंस्थाः अभवन् । तेन अस्माकं नैतिकमुल्यानां हानिः अभवत् । तथा च अस्माभिः अस्माकं जीवनपद्धतिः का भवति इत्यपि न ज्ञायते । परन्तु स्वाधीनतानन्तरं कोठारी, मुदलियर् इत्यादयः आगताः, येन अस्माकं शिक्षापद्धतौ कानिचन परिवर्तनानि जातानि। श्रीकस्तुरीरङ्गन्महोदयस्य आध्यक्ष्ये NEP 2020 नवराष्ट्रियशिक्षानीतिः निर्मिता । तत्र IKS इति विषयः भवतु येन संस्कृतस्य तथा भारतीयज्ञानपरम्परायाः विकासो भविष्यति इति चिन्तितवान्। NEP 2020 अनुसारं चतुर्वर्षात्मकं BA Honours अनन्तरं यत् एकवर्षात्मकं PG भवति तत्र Interdisciplinary भवतु इति । एकं षाण्मासिकं संस्कृतम् , अन्यं षाण्मासिकम् आधुनिकविषयः भवतु इति । मन्त्रिमहोदयेन उक्तं यत् तिरुपतिस्थानां त्रयाणां संस्थानानां राष्ट्रियसंस्कृतविश्वविद्यालयः , IIT, ISER च मेलनेन एकः कार्यक्रमः Inter Disciplinary Programme (Inter-exchange programme for faculty and students) भवेत् इति। एवं प्रकारेण यदि एकः Centre for Artificial Intelligence And Sanskrit Studies इत्ययं भवति चेत् सर्वेऽपि संस्कृतज्ञाः वैज्ञानिकाः भवन्ति । सर्वेऽपि वैज्ञानिकाः संस्कृतज्ञाः भवन्ति, तदा एव IKS इत्यस्य महान् लाभः भवति इति समसूचयत्।

ततः राष्ट्रियसंस्कृतविश्वविद्यालयस्य कुलाधिपतिः **श्रीमान् नीडामङ्गलंगोपालस्वामिमहाभागः** भारतीयज्ञानपरम्पराकेन्द्रस्य उद्घाटनं हर्षस्य विषयः । अत्र सर्वेपि छात्राः कटिबद्धाः भूत्वा शास्त्रीयान् लोकोपयोगिविषयान् बहिरानयन्तु । विशिष्य शोधच्छात्राः अमुष्मिन् विषये शोधाय यतन्ताम् । आधुनिकोषधीनां विनियोगः रोगापगमाय क्रियते, किन्तु केषाञ्चन वर्षाणामनन्तरं ज्ञायते यत् तैरौषधैः नूतनव्याधिः सभवतीति । प्राचीनकालेपि कृषिरासीत्, वैद्यमासीत्, पशवः आसन्, गृहाणि आसन्, तत्र सवत्र प्राचीनाः समस्याः अनुभूय तासां परिष्कारान् अवगत्य तान् ग्रन्थेषु उपनिबबन्धुः। तान् बहिरानयन्तु इति विशिष्य शोधच्छात्रेभ्यः प्रचोदनं प्रादात्। प्रकृत्या सह जीवितुम् अभ्यस्यन्तु इति सन्देशम् अददात् । केन्द्रेण अनेन लोकाय उपयोगः भवेदिति आशां प्राकटयत् ।



ततः अधिमञ्चम् उपस्थितानां मान्यानां सम्मानमक्रियत । राष्ट्रियसंगोष्ठ्याः सहसंयोजकः डा.कुमारः बागेवाडीमठः समागतेभ्यः सर्वेभ्यः धन्यवादं व्यातनोत् । इत्थं भारतीयज्ञानपरम्पराकेन्द्रस्य एकदिवसीयराष्ट्रियसङ्गोष्ठ्याः च उद्घाटनरूपं प्रथमसत्रं समपद्यत ।








राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः (आ.प्र.)
भारतीयज्ञानपरम्पराकेन्द्रस्य उद्घाटनम्
INAUGURATION OF IKS CENTRE IN NSU AND
सर्वेभ्यः स्वागतम्








राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः (आ.प्र.)


राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः (आ.प्र.)


राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः (आ.प्र.)
भारतीयज्ञानपरम्परायां नीतेः शासनस्य राजधर्मस्य




राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः (आ.प्र.)







**एकदिवसीयराष्ट्रियसङ्गोष्ठ्याः द्वितीयसत्रम् –**




भारतीयज्ञानपरम्परायां नीतेः शासनस्य राजधर्मस्य च प्रासङ्गिकता इति विषये प्रवर्तितायाः एकदिवसीयराष्ट्रियसङ्गोष्ठ्याः द्वितीयसत्रे आचार्याः शिवरामभट्टाः सञ्चालकाः **आचार्याः जि.शङ्करनारायणवर्याः** अध्यक्षाः मुख्यवक्तारश्च भारतीयज्ञानपरम्परायाः राष्ट्रियसंयोजकाः **आचार्याः गण्टिसूर्यनारायणमूर्तिवर्या, आचार्याः हनुमन्तुलजपतिरायवर्याः** अभूवन् । मुख्यवक्तारः तत्रभवन्तः भारतीयज्ञानपरम्परायाः परिचयपूर्वकं तदीयप्रामाणिकत्वादिसन्दर्भे अभाषन्त। तत्र कस्यापि विज्ञानस्य प्रामाणिकत्वं प्राचीनत्वेन नवत्वेन वा न स्वीक्रियते अपि तु परीक्षणेनैव स्वीक्रियते इति अवोचन् । एवमेव अस्माकं देशः प्राचीनकालादेव ज्ञानविज्ञानयोः क्षेत्रे अग्रगण्यः आसीत् । मध्यकाले वैदेशिकानां ब्रिटिशजनानाम् आक्रमणहेतोरेव सर्वं नष्टम् । तेन भारतीयज्ञानपरम्परैषा न अर्वाचीना अपि तु पुराणा एव। ज्ञानं विज्ञानं जीवनदर्शनञ्च इत्येतत्त्रितयं मिथः सम्पृक्तं भवति। एतच्चक्रं सर्वेष्वपि शास्त्रेषु भवति। इत्थं पुनः भारतीयज्ञानपरम्परायामित्यत्र विद्यमानः परम्पराशब्दः अतीतानागतसंयोजनपरो वर्तते। एवमेव भारतीयज्ञानसंसाधनानि मातृकादीनि, भारतीया दृष्टिः एतद्द्वयमपि अस्माभी रक्षणीयम्। इत्थं संसाधनानां पूरणदिशि चिन्तनं प्रवर्तयितव्यम्। कस्याश्चिच्च समस्यायाः निवारणोपायः सर्वतोमुखी अन्वेष्टव्यः। न तु नूतनसमस्योद्भूतिः कर्तव्या। इत्थम्पुनः सर्वेषामपि भारतीयदृष्ट्या आधिभौतिक- आध्यात्मिक-आधिदैविक-पुरुषार्थचतुष्टयादिना चिन्तनं शक्यते । अर्थनीतिप्रभृतिषु सर्वेष्वपि क्षेत्रेषु भारतीयदृष्टेर्वर्तते महती आवश्यकता। यतः वैदेशिकानां शुद्धलाभः(Capitamism), शून्यलाभः(Communism) इत्येतद्द्वयं स्थूलदृष्टिहेतोः क्षणकालप्रसारि अभूत्। परमस्माकं शुभलाभ इति सहस्राधिकवर्षव्यापिनी दृष्टिः अद्यापि जीवति। सैषा भारतीया दृष्टिः। एवमेव समाजे सम्प्रति धनलक्ष्म्याः चर्चा एव विद्यते। परम् अस्माकं तु राजसन्तानविजयाद्यष्टलक्ष्मीचिन्तनेन दृष्टिः विजयतेतराम्। भारतीया दृष्टिः चैतन्यात् तत्त्वात्मिका (Consciousness to matter) भवति, बाहीकानां तु एतद्विपरीता। एतदनु भारतीयजलवातावरणकृषिकार्याणां परिचायकस्त्रोतसां तदुद्भवविकासक्रमविषयश्च कथमासीदिति उदबोधयन् । एवमेव गणितादिविषयः, वैदेशिकानां प्रत्यक्षप्रमाणात् योगजप्रत्यक्षत्वग्रहणेन अस्मदीयं प्रत्यक्षप्रमाणं कथं भिद्यत इति विषयं प्रास्तुवन्। भारतीयदर्शने प्रमाणवैविध्यं दर्शितवन्तः ततः "विना तर्केण या सिद्धिः यदृच्छाशक्तिरेव सा" इत्यादिना प्रमाण्यकार्षुः। इत्थमग्रे भाषाज्ञानेन सह विषयज्ञानस्याप्यपेक्षा विद्यत इति लीलावत्याद्युदाहरणदर्शनपूर्वकं प्रत्यपादयन्। ततः कटपयादिव्यवस्थां श्रीकृष्णविषयकश्लोकनिदर्शनपूर्वकं पर्यचाययन्। तदनु हितभुक्-मितभुक्-ऋतभुक्-प्रभृतिविषयमपि प्रास्तुवन्। ततः भारतीयज्ञानपरम्परायां स्त्रोतसां विषयम्, एतां भारतीयज्ञानपरम्परां प्रति जनानां प्रवृत्त्युन्मुखीकरणविषयमपि अवादिषुः। तदनु भारतीयज्ञानपरम्परायाः विभिन्नयोजनानां विश्लेषणम्, शोधाय छात्राणां प्रवृत्तिम्, पाठ्यपुस्तकनिर्माणे आचार्येभ्यो निवेदनम्, विभिन्नसंस्थासु आधुनिकविषयैस्सह भारतीयज्ञानपरम्परायाविषयवैविध्यम् अवदन् । एवमेव AI-IKS इत्यनयोः अन्तस्सम्बन्धपरिकल्पनम्, भारतीयम् AI-निर्माणम्, BUDDHI YOGA GAME, इत्यादिविषयान् प्रस्तुस्त्य-



"सत्येन ब्रह्मचर्येण व्यायामेनाथ विद्यया।
देशभक्त्यात्मत्यागेन सम्मानार्हः सदा भव ॥"

इत्यादिना स्वकीयं वक्तृत्वम् उपसमहार्षुः । ततः कुलपतिभिः मुख्यवक्तॄणां सम्माननं विहितम्। ततः हनुमन्तलजपतिरायवर्याः स्वीयं भाषणं प्रास्तुवन्। तत्र ते भारतीयप्राशासनिकसेवा(UPSC)-परीक्षायां भारतीयज्ञानपरम्परायाविषयस्य अन्तर्भावनविषयं राष्ट्रियसंयोजकेभ्यो न्यवेदयन्। ततः भारतीयज्ञानपरम्परासन्दर्भे महाभारतोपरि स्वनिर्मितस्य

पाठ्यक्रमस्य विवरणमदुः । एवमेव रामायणे वर्णितानां भौगोलिकक्षेत्राणां भगवता श्रीरामेण गतानामुपरि कथं संस्कृतेतरा अपि आधुनिकच्छात्राः शोधं कर्तुं शक्ष्यन्तीति प्रत्यपादयन् ।




ततः सत्राध्यक्षाः **आचार्याः जि.शङ्करनारायणवर्याः** – अस्माकं सर्वेष्वपि विषयेषु भारतीयज्ञानपरम्परा अन्तर्निगूढा वर्तते । “मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः” इत्याद्युक्तरीत्या विज्ञानशब्देन सर्वा अपि भारतीयविद्याः गृह्यन्ते। एताश्च प्रचारणीयाः। एताः पुनस्सर्वा अपि आध्यात्मिकलक्ष्यम् एकमेव कृत्वा प्रवर्तिताः। तत्र आध्यात्मिकविद्यामेव मनसि कृत्वा तदर्थं यावदपेक्षितं तावदेव अस्मत्पूर्वजैस्साधितम्। वेदान्तादिविद्यासु आध्यात्मिकविद्याः लक्ष्यीकर्तुं शक्याः। पाश्चात्त्यलोकेन लौकिकविद्याक्षेत्रे बहु किमपि आसदितं भवति। परम् अस्मत्पूर्वजैः आध्यात्मिकीं विद्यां पुरस्कृत्य आधुनिकविद्या प्रसारिता, सैषा भारतीया दृष्टिः। यथा लवणं (Sodium Cloride) तावत् Sodium पुनः Clorine इति तत्त्वद्वयस्य सङ्घटितरूपम्, तथा सदेव तत् सेवनयोग्यं भवति, न तु तयोरन्यतरः पृथक् तथा भवति। तद्वद् आध्यात्मिकी आधुनिकी इति उभयोः विद्ययोः परस्परं सहयोग एव भारतीया दृष्टिर्भवति। आध्यात्मिकविद्याया अभिवृद्ध्या यत्र वा वैज्ञानिकांशानाम् अभिवृद्धिर्भवेत्, तादृशविषयेष्वेव दृष्टिः प्रसारणीया, येन “भारतीयज्ञानपरम्परा” इत्यत्र ज्ञानशब्दस्य सार्थक्यं भवतीति उक्त्वा अध्यक्षभाषणं प्रास्तुवन् । ततः सत्राध्यक्षाणां कुलपतिभिः सम्मानेन सञ्चालकानाम् आचार्यशिवरामभट्टवर्याणां धन्यवादार्पणेन सत्रान्तर्वर्तिनः समेऽपि कार्यक्रमाः समाप्तिमगुः।










## एकदिवसीयराष्ट्रियसङ्गोष्ठ्याः तृतीयसत्रम् –




एकदिवसीयराष्ट्रियसंगोष्ठ्याः तृतीयसत्रस्य वक्ता बेङ्गळूरुचाणक्यविश्वविद्यालयस्य सहाचार्यः **डा. रामकृष्णपेजत्तायमहोदयः** **Meaning Beyond Words Cultural Layers In Social Science Terms And Dharma As The Moral Backbone Of Governance** इति विषयमधिकृत्य स्ववक्तव्यं प्रास्तवीत्। भारतीयशासनदृष्टिः केवलं शासनस्य यन्त्ररूपं नास्ति, अपि तु एकं समग्रं दार्शनिकं च चिन्तनम् अस्ति। अस्य मूलं धर्मे निहितम्। प्राचीनभारते धर्मः केवलं धार्मिककर्मभिः सीमितः न, किन्तु समाजस्य राज्यस्य च आधारभूतः सिद्धः। धर्मः राज्यस्य नियन्त्रकः मार्गदर्शकः च अस्ति। मनुस्मृतौ स्पष्टतया निर्दिष्टं यत् राज्ञः प्रथमं कर्तव्यं धर्मपालनं प्रजासुखं च। धर्मं परित्यज्य राज्यस्य सत्ता दीर्घकालिकं न भवति इति उक्तम्।

पश्चिमदेशीयशासनदृष्टौ सत्ता वा अधिकारः प्रधानः, यत्र नियमः केवलं विधिप्रमाणेन निश्चितः। किन्तु भारतीयशासनदृष्टिः व्यक्तित्वं सामाजिकसम्प्रदायं धर्मपरम्परां च केन्द्रीकरोति। कौटिल्यस्य अर्थशास्त्रे राज्यस्य मूलाधारः धर्मः, अर्थः, कामः, मोक्षः इति निर्दिष्टाः। एतेषु धर्मः राज्यस्य नीतेः आधारः, अर्थः राज्यस्य सामर्थ्यं, कामः प्रजासुखं, मोक्षः अन्तिमं लक्ष्यम् इति विवरणम् अस्ति।

भगवद्गीतायामपि स्पष्टतया उच्यते - धर्मधारणमेव शासनस्य सारः। यदि शासनं धर्मपरायणं भविष्यति तर्हि न केवलं स्थायित्वं लभते, किन्तु प्रजाः आत्मीयं च सुखम् अनुभवन्ति। न्यायनिर्णयः करनियोजनं युद्धनीतिः राजनैतिकसंबन्धाः च धर्मस्य आधारे भवन्ति।

भारतीयशासनदृष्टेः एकः विशेषगुणः यत् तत्र केवलं शासनकर्तुः अधिकारः न, किन्तु तस्य उत्तरदायित्वं प्रजानां प्रति अधिकं महत्त्वम् अस्ति। प्रजाः केवलं राज्ञः अधीने न, अपि तु राज्यस्य मूलसङ्घटनस्य सहभागिनः इति दृष्टिः अत्र दृश्यते। अयं दृष्टान्तः भारतस्य प्राचीनशासनचिन्तनस्य सामाजिकसम्प्रदायस्य आधारः प्रकटयति।

आधुनिककालिकशासनव्यवस्थायामपि अस्य दर्शनस्य उपयोगिता अतीव महत्वपूर्णा। न्यायपरायणता पारदर्शिता धर्मनिष्ठा च आधुनिकराज्यनिर्माणस्य आवश्यकानि अङ्गानि भवन्ति। एषा भारतीयशासनदृष्टिः केवलं सत्तासंरक्षणं न, अपि तु समाजस्य कल्याणं धर्मसंरक्षणं च साधयति।

अतः स्पष्टतया वक्तुं शक्यते यत् भारतीयशासनदृष्टिः केवलं नियमैः न, किन्तु धर्मपरम्परया न्यायपरायणतया प्रजापरायणतया च सञ्चालितं भवति। इयं भारतीयशासनदृष्टिः राष्ट्रस्य दीर्घकालिकस्थायित्वाय प्रजासुखाय न्यायनिष्ठायै च अनिवार्या अस्ति।




**सत्राध्यक्षभाषणं कुर्वन्तः आचार्याः नारायणमहोदयाः** मुख्यवक्तुः सुगम्भीरस्य नूतनदृष्टिप्रदायकस्य च भाषणस्य कृते हार्दान् धन्यवादान् उक्त्वा भारतीयशास्त्राणि आश्रित्य काश्चन मुख्यान् विषयान् प्राकाशयन्।

महाभारते राजधर्मः - ते उल्लिखितवन्तः यत् महाभारतस्य शान्तिपर्वणि राजधर्मः नीतिः प्रशासनञ्च विस्तरेण निरूपितम् अस्ति यत् अद्यापि अत्यन्तं प्रासङ्गिकम्।

"राजा प्रत्यक्षदेवता" इति कल्पनायाः व्याख्या - अस्याः वैदिक्याः कल्पनायाः मूलं निरूपयन्तः ते अवदन् यत् स्वयं देवाः मनुष्यान् शिक्षितुं भूमौ अवतरन्ति। राजा च तस्याः दैविकव्यवस्थायाः एव अंशः। तस्य कर्तव्यं प्रजानां समग्रस्य जीवनस्य शिक्षा, आरोग्यम्, विवाहः इत्यादीनां संरक्षणं सुव्यवस्थापनं च।

राज्ञः नैतिकं दायित्वम् - अध्यक्षाः महाभारतात् एकं महत्त्वपूर्णं वचनम् उद्धृतवन्तः यत् प्रजाभिः कृतानां पुण्यानां पापानां वा चतुर्थस्य भागस्य राजा भागी भवति। अतः राज्ञः दायित्वम् अत्यन्तं गुरुतरम्। इदमपि अवदन् यत् यदि राजा उद्योगशीलः सक्रियश्च भवति तदैव प्रजानां श्रेयः अन्यथा यदि रक्षकः एव क्षेत्रस्य सस्यं खादति तर्हि प्रजाः दुर्दशां प्राप्नुवन्ति।

शब्दानां यथार्थप्रयोगः धर्मशब्दस्य च व्यापकता - आचार्यपेजत्तायमहाभागानां विचारेण सहमतं दर्शयन्तः अवदन् यत् शब्दानां मूलम् अज्ञात्वा प्रयोगः भ्रमं जनयति यथा तैलशब्दः तिलादुत्पन्नोऽपि सर्वविधस्नेहार्थं प्रयुज्यते। तस्य मते 'Rights' इत्यस्य कृते सर्वथा उपयुक्तः व्यापकश्च शब्दः **"धर्मः"** एव। यतः सः व्यक्तिसमाजराष्ट्राणां सर्वेषाम् अधिकाराणां कर्तव्यानाञ्च बोधकः।

"राजा कालस्य कारणम्" - भीष्मस्य प्रसिद्धं वचनं स्मारयन्तः ते उक्तन्तः यत् राजा एव कालस्य निर्माता भवति। एकः समीचीनः उद्यमशीलः राजा एव राष्ट्रस्य समुन्नतिं कर्तुं शक्नोति। अन्ते भारतीयज्ञानप्रणाल्याः शाश्वतप्रासङ्गिकताम् उल्लिख्य स्ववचनं समापितवन्तः। वक्त्रोः अध्यक्षस्य च सम्मानपुरस्सरं सत्रमिदं समाप्तम् अभवत्। इदं सत्रं वस्तुतः भारतीयज्ञानपरम्परायाः गाम्भीर्यं समकालिकजगति तस्याः प्रासङ्गिकतां च अवगन्तुं नूतनां दृष्टिम् अददात्। अस्य सत्रस्य संचालनं सङ्गोष्ठ्याः सहसंयोजकः डा.कुमारबागेवाडिमठः अकरोत्।







**एकदिवसीयराष्ट्रियसंङ्गोष्ठ्याः चतुर्थसत्रम् -**




एकदिवसीयराष्ट्रियसंङ्गोष्ठ्याः चतुर्थसत्रस्य अध्यक्षाः अद्वैतवेदान्तविभागस्य अध्यक्षाः शास्त्रपरिरक्षणकेन्द्रस्य निदेशकाः आचार्याः के. गणपतिभट्टमहोदयाः आसन्। वक्तारः विजयनगरस्थवाल्मीकिसंशोधनकेन्द्रस्य निदेशकाः आचार्याः हनुमन्तलजपतिरायमहोदयाः आसन्।

तत्र वक्तारः **आचार्याः हनुमन्तुलजपतिवर्याः** MAHABHARATHA AND MODERN KNOWLEDGE SYSTEMS इत्यस्मिन् विषये द्वयोः षाण्मासिकयोः कृते यं पाठ्यक्रमं स्वयं निर्मितवन्तः तस्य प्रतिपादनं कृतवन्तः। महाभारते विद्यमानेषु अष्टादशसु पर्वसु विद्यमानाः अंशाः कथं दैनन्दिनजीवने अस्माभिः ग्राह्याः इत्यपि प्रतिपादितवन्तः। यथा-

आदिसभापर्वभ्याम् एते अंशाः ग्राह्याः –

- अक्षक्रीडाद्यनैतिककार्येण न केवलं स्वस्य हानिः, अपि तु सम्पूर्णस्य कुटुम्बस्यैव हानिः भवति। यथा द्रौपद्याः वस्त्रापहरणम्।
- अस्माकम् आचारः नैतिकः उत अनैतिकः इति विचारः करणीयः।

विराटपर्वणः एते अंशाः ग्राह्याः –

- अस्माभिः दृढनिश्चयैः भाव्यं यथा पाण्डवाः अज्ञातवासे कष्टानि प्राप्तवन्तोऽपि अज्ञाताः एव आसन्।
- कदाचित् अस्माभिः अस्माकं गुणाः आच्छादनीयाः भवन्ति।

- अत्र पर्यावरणविषयेऽपि विचाराः सन्ति।

उद्योगपर्वणि यथा –

- दौत्यकर्मणः विषये व्यवहारविषये च सुविस्तृतं वर्तते। अयं च विषयः आधुनिकान्तराष्ट्रियविषये उपयोगाय भवति।

एवं प्रकारेण प्रत्येकमपि पर्वणः आधुनिककाले उपयोगः कथं शक्यते इति तैः स्वल्पेऽपि काले विस्तृतरूपेण प्रतिपादितम्।




तदनन्तरम् अध्यक्षभाषणं कुर्वन्तः **आचार्याः के गणपतिभट्टमहोदयाः** इत्थमवोचन् - अन्तस्थः कोलाहलः वर्तते भारते, बाहीकः कोलाहलः वर्तते रामायणे। अन्तस्थैः बाहीकैश्च सह च कोलाहलः दृश्यते कलियुगे। तादृशकोलाहलसन्दर्भे कथं वा परस्परसम्बन्धः वर्धनीयः इति भारते यानि तत्त्वानि वर्तन्ते तानि तत्त्वानि स्वीकृत्य अस्माभिः वर्धयितुं शक्यते इति प्रस्तुतस्य पत्रस्य सारः भवति। एवमेव केषाञ्चन वेदभाष्यादिषु निरुक्तानां राजसम्बन्धिशब्दानां प्रासङ्गिकत्वं प्रत्यपादयन्। यथा - इन्द्रः देवानां राजा भवति। इन्द्रशब्दार्थप्रतिपादनेन राजा कथं भवेत् इति वेदद्वारा प्रतिपादयितुं शक्यते इति इदं भारतीयं विज्ञानम्। तर्हि इन्द्रशब्दस्य व्युत्पत्तिः कीदृशी भवति, ऋगवेदभाष्ये कथम् इन्द्रशब्दस्य अर्थाः प्रदर्शिताः इति प्रतिपादितं तैः। यथा इरां दृणाति इति इन्द्रः। अर्थात् इराम् अन्नादि व्रीह्यादिव्युत्पत्तिं कारयति इति इन्द्रः। तर्हि यथा इन्द्रः प्राणिनां विभागम् अदृष्ट्वा सर्वेषां कृते अपेक्षितम् अन्नम् अपेक्षितकाले अपेक्षितोपाधिना ददाति तथैव राजा अपि कालानुगुण्येन देशानुगुण्येन च आहारस्य व्यवस्थायां न्यूनता यथा न स्यात् तथा आचरेत्। अपि च इन्दुना सह सम्बन्धं प्राप्नोति इति इन्द्रः भवति। तर्हि तथैव लोके अपि राजानः प्रजानां हृदये भवेयुः इति अर्थात् प्रजानुकूलं क्रियते चेदेव तथा भवति। अतः राजभिः प्रजानुकूलम् आचरणीयम्। एवं प्रकारेण राज्ञः अन्ये गुणाः अपि इन्द्रव्युत्पत्या सिद्ध्यन्ति इति तैः प्रतिपादितम्। यथा राजा अन्तस्थः व्यापकः, बाहीकः दुर्लभः भवेत्, पराधीनः नैव भवेत्, क्षमावान् भवेत्, अपि च अरिषड्वर्गपरित्यागी भवेत्।

एवं प्रतिपाद्य गणपतिभट्टमहोदयाः वक्त्रा उपस्थापितस्य विषयस्य प्रशंसां कृत्वा एतादृशी गोष्ठी दशदिनात्मिका भवतु इति कुलपतिमहोदयं सम्प्रार्थ्य धन्यवादसमर्पणं कृतवन्तः। सत्रस्य सञ्चालनं संगोष्ठ्याः संयोजकः आचार्यः शिवरामभट्टः अकरोत्।






**एकदिवसीयराष्ट्रियसंङ्गोष्ठ्याः पञ्चमसत्रम् –**

## एकदिवसीयराष्ट्रियसंगोष्ठ्याः समापनकार्यक्रमः

भारतीयज्ञानपरम्परायां नीतेः शासनस्य राजधर्मस्य च प्रासङ्गिकता (Relevance of Ethics, Governance and Rajadharma in IKS) इति विषयमधिकृत्य समायोजितायाः एकदिवसात्मकराष्ट्रियसंगोष्ठ्याः समापनसमारोहः 25.09.2025 दिनाङ्के सायम् 04.30 वादने श्रीचेलिकानि-अन्नारावशैक्षणिकभवनसभागृहे आयोज्यत ।




वैदिकप्रार्थनया कार्यक्रमस्य आरम्भः समजनि । विश्वविद्यालयस्य छात्राः वैदिकप्रार्थनामकुर्वन् । लौकिकप्रार्थनां शोधच्छात्रा रा.प्रियंवदा अकरोत् । संगोष्ठ्याः इतिवृत्तं राष्ट्रियसंगोष्ठीसंयोजकः आचार्यः शिवरामभट्टः अकथयत् । - शैक्षणिकसंकायाध्यक्षः आचार्यः रजनीकान्तशुक्लवर्यः मार्गदर्शनम् अकरोत् । कुलपतिः आचार्यः गुळ्ळपल्लिश्रीरामकृष्णमूर्तिवर्यः अध्यक्षभाषणम् अकरोत् । आचार्यः शिवरामभट्टः धन्यवादसमर्पणम् अकार्षीत् । डा.कुमारः बागेवाडीमठः समारोपसमारोहस्य संचालनम् अकार्षीत् ।

पञ्चमसत्रम् अस्याः संगोष्ठ्याः समारोपसमारोहः आसीत् । पञ्चमसत्रस्य प्रारम्भे वैदिकी प्रार्थना अभवत् । ततः परं लौकिकी प्रार्थना अभवत् । आचार्यः शिवरामभट्टमहोदय: समग्रकार्यक्रर्मस्य इतिवृत्तान्तं भणितवान् । पूर्वेषु सत्रेषु बहवः वक्तारः यान् विषयान् उक्तवन्त: तान् सर्वान् विषयान् नाममात्रं प्रस्तुतवान् । भारतीयज्ञानपरम्परायाः केन्द्रस्य विषये महोदयेन एवम् इतिवृत्ते उक्तम् -




समग्रभारतवर्षे भारतीयज्ञानपरम्परायाः केन्द्रं प्राप्तुं बहवः संस्थाः आवेदनं कृतवत्यः । तासु 18 केन्द्राणि स्वीकृतानि । तत्र चत्वारः संस्कृतविश्वविद्यालया :सन्ति । तेषु चतुर्षु विश्वविद्यालयेषु केन्द्रीयविश्वविद्यालयः तिरुपतिः तृतीयस्थानं प्राप्नवत् । एतत् अस्माकं सौभाग्यम् वर्तते इति ।




ततः मार्गदर्शकभाषणं कुर्वद्भिः आचारयैः रजनीकान्तशुक्लमहोदयैः एकदिवसात्मकराष्ट्रियसंगोष्ठीविषये आलोचनम् कृतम् । संस्कृतसमुद्रमन्थनार्थं IKS इति योजना आगता । तस्मात् समुद्रात् भारतीयज्ञानपरम्पराव्याजेन रत्नानि अन्वेष्टुम् शक्यन्ते । देवतुल्यऋषिभि: निर्मितं ज्ञानं प्राप्त्यर्थम् अस्माभि: संस्कार: अपेक्ष्यते । सत्यं वद इत्यादिवचनानां पालनेन तत् प्राप्तुं शक्यते । भारतीयज्ञानपरम्परायाः प्रचारप्रसारादिकम् अपि करणीयम् । "ज्ञानेन यत् अर्जितं तदेव विज्ञानेन । अध्यक्षभाषणं कुर्वद्भिः कुलपतिभिः इत्थमुक्तम् - भारतीयज्ञानपरम्पराव्याजेन संस्कृतस्य शिक्षणम् अपि भवितुम् अर्हति। विज्ञानस्य एवं संस्कृतस्य भारतीयज्ञानपरम्परामाध्यमेन समन्वय: अस्माकम् लक्ष्यम् ।





संस्कृतच्छात्राणां लोकसेवायोगे प्रवेशः अपि भवति । विद्यापीठे ये विजीगिषवः सन्ति तेषां लोकसेवायोगे प्रवेशार्थं साहाय्यं प्रयच्छन्ति अध्यापकाः । रामायणमहाभारतादिषु धर्मादिविषये उक्तवन्तः। आधुनिकपरम्परासम्बन्धिविषयाणां समन्वयः कथं भवति तद्विषये अपि चिन्तनीयम् । नूतनविषयाणाम् उन्मोचनं चिन्तनं च कर्तव्यम् । आङ्ग्लीयानाम् अपि संस्कृते एव जिज्ञासा । भारतीयज्ञानपरम्परामाध्यमेन लोकसेवायाम् उद्योगं प्राप्तुं शक्नुवन्ति ।



संस्कृतशास्त्रं न केवलं पठनार्थम् अपि तु संस्कृतशास्त्रमाध्यमेन बहूनि कार्याणि अपि साधयितुं शक्नुमः । संस्कृतशास्त्रेण जनाः उद्योगिनः अपि भवितुम् अर्हन्ति । एतद् व्यतिरिच्य अपि संस्कृतशास्त्रेण जनानाम् उपलब्धिः भवति । संस्कृतशास्त्रमाध्यमेन आध्यात्मिकक्षेत्रे आधुनिकक्षेत्रे च वयम् अग्रे गच्छामः। " नहि ज्ञानेन सदृशं पवित्रमिह विद्यते।" इति । ततः मान्यानाम् अधिमञ्चं विराजमानानां सत्कारः अक्रियत । ततः धन्यवादसमर्पणेन एकदिवसात्मकराष्ट्रियसंगोष्ठ्याः समारोपसमारोहः समपद्यत ।





**Centre for IKS and One day National Seminar on Relevance of Ethics, Governance and Rajadharma in IKS on 25.09.2025**

First Session - https://www.youtube.com/live/teRyRsD0TT4?si=-WyRZIurWhmfrzx1
Second Session - https://www.youtube.com/live/gKeHPE4Ca7s?si=T3JdA5Ev8ai29tIa
Third Session - https://www.youtube.com/live/nt1N3k_eGIQ?si=vcrgIHYlOmmZ23pF
Fourth Session - https://www.youtube.com/live/5l8LunpnjHc?si=ghOdbFjffaHgUReI
Fifth Session - https://www.youtube.com/live/TuY4V7AjZQw?si=mI6ct1sRFIa5qXRV
News video - https://youtu.be/6wmsW3qf-Zs?si=dA_f6CLPlTZuxrmE
News paper - https://share.google/uhPOerI4MWBsmehB0










**अयि मान्याः गीर्वाणवाणीसमुपासकाः,**

**भारतीयज्ञानपरम्पराकेन्द्रम्**- महतः प्रमोदस्य विषयोऽयं यत् भारतसर्वकारस्य शिक्षामन्त्रालयस्य भारतीयज्ञानपरम्पराविभागेन राष्ट्रियसंस्कृतविश्वविद्यालयः भारतीयज्ञानपरम्पराकेन्द्रत्वेन 31.08.2025 दिनाङ्के प्रत्यभिज्ञात इति। भारतीयज्ञानपरम्परायाः वैभवं नवनवोन्मेषचिन्तनेन विश्वव्यापि भवतु इति धिया बहुविधलक्ष्यं मनसि निधाय भारतीयज्ञानपरम्पराविभागेन क्रियमाणेषु कार्यविशेषेषु विविधशैक्षणिकसंस्थानेभ्यः प्रदीयमानं केन्द्रमप्यन्यतमम्। प्राचीनाधुनिकसंगमेन ज्ञाने चिन्तने व्यवहारे च भारतीयता सम्पद्यत इति हेतोः विविधकार्यक्रमान् प्रकल्पांश्च साधयितुं विभागः आर्थिकसाहाय्यं करोति ।

**एकदिवसात्मकराष्ट्रियसंगोष्ठी** - भारतीयज्ञानपरम्परा (IKS) ज्ञानस्य जीवनस्य शासनस्य च समन्वयं करोति। नीतिः राजनीतिः राजधर्मश्च तस्याः प्रमुखाः आधाराः। एते विषयाः वेदेषु उपनिषत्सु धर्मशास्त्रेषु इतिहासेषु पुराणेषु अर्थशास्त्रे च विवृताः। तत्र नैतिकतान्यायः लोककल्याणं च शासनस्य मार्गदर्शकसिद्धान्ताः इति प्रतिपादितम्।

अद्यतनयुगे भ्रष्टाचारः पर्यावरणदूषणं नैतिकह्रासः नेतृत्वसंकटं च सर्वत्र दृश्यते। एतेषु प्रसङ्गेषु प्राचीना भारतीयराजधर्मनीतयः चिरन्तनमार्गदर्शकाः भवन्ति। तेषां पुनरवलोकनं लोकतन्त्रंसततविकासं नैतिकनेतृत्वं च बलवत्तरं कर्तुं शक्नोति।

अस्यां संगोष्ठ्यां नीतियुक्तशासनराजधर्मसिद्धान्तानाम् आधुनिकजीवने प्रासङ्गिकत्वस्य चर्चा भविष्यति। तत्र मुख्याः उपबिन्दवः इत्थं सन्ति । यथा –

a) शासनस्य नैतिकमूलं धर्मः।
b) राजधर्मः (राज्ञः कर्तव्यम् / शासनकर्तुः उत्तरदायित्वानि)।
c) विधिः न्यायः नियमपालनं च।
d) शासकानां प्रशासकानां च नैतिकगुणाः सद्गुणाश्च।
e) लोककल्याणम् (जनकेन्द्रितशासनम्)।
f) पारदर्शिता उत्तरदायित्वं शक्तेः नैतिकनियन्त्रणं च।
g) अर्थसमृद्धेः नीत्या सह संतुलनम्।
h) मन्त्रिणाम् उपदेशकानां संस्थानानां च भूमिका।
i) नीतिशिक्षा आख्यानोपाख्यानद्वारा।
j) नीत्याः च उपायप्रयुक्तेः च संघर्षः।
k) तुलनात्मकपरम्पराः – बौद्धजैनदर्शनदृष्टयः।
l) पर्यावरणनीतिः संरक्षणकर्तृत्वं च।










## वार्ताप्रसारः



ఈనాడు
epaper.eenadu.net

### సంస్కృతంతో జ్ఞానం.. విజ్ఞానం

**తిరుపతి విద్య, న్యూస్‌టుడే:** ఐకేఎస్ కేంద్రం ద్వారా ప్రతి ఒక్కరూ సంస్కృత భాషతో పాటు అందులోని జ్ఞానాన్ని పెంపొందించుకునే దిశగా ఎదగడం ఆనందకరమని జాతీయ సంస్కృత విశ్వవిద్యాలయం కులపతి ఎన్. గోపాలస్వామి పేర్కొన్నారు. గురువారం వర్సిటీ ఆవరణలో ఐకేఎస్ కేంద్రాన్ని ఆయన ప్రారంభించారు. సహస్రావధాని మాడుగుల నాగఫణిశర్మ, వర్సిటీ ఉపకులపతి ఆచార్య జీఎస్ఆర్ కృష్ణమూర్తి తదితరులు ప్రసంగించారు.

ఐకేఎస్ ప్రారంభోత్సవంలో గోపాలస్వామి, మాడుగుల నాగఫణిశర్మ, వీసీ జీఎస్ఆర్ కృష్ణమూర్తి తదితరులు



### నూతనంగా ఐ.కె.ఎస్ కేంద్ర ప్రారంభోత్సవం

-ముఖ్యఅతిథిగా విచ్చేసిన గౌరవ కులాధిపతి శ్రీ నీలామంగళం గోపాలస్వామి

Hans India

# NSU launches IKS hub to promote Sanskrit wisdom



NSU Chancellor N Gopalaswamy inaugurating IKS Centre in Tirupati on Thursday. Vice-Chancellor Prof GSR Krishna Murthy and others are seen.

HANS NEWS SERVICE
TIRUPATI

A new Indian Knowledge System (IKS) Centre was inaugurated on Thursday at National Sanskrit University (NSU), Tirupati, marking a major initiative to promote research into India's intellectual heritage. The centre has been set up with the support of Bharatiya Gyan Parampara (IKS Division), Ministry of Education, New Delhi.

NSU Chancellor N Gopalaswamy formally inaugurated the centre and expressed delight at its establishment. He stressed the significance of uncovering scientific and philosophical knowledge preserved in Sanskrit texts. "Our vision is for this IKS Centre to become a global destination, attracting scholars from around the world and ensuring that this wisdom reaches everyone," he said. He also urged the university to prepare a five-year roadmap with specific goals.

In his address, Padma Shri awardee Madugula Nagaphani Sharma highlighted the role of mindfulness in Indian tradition, noting its potential to enhance memory and creativity among students. He encouraged everyone to explore the scientific and psychological depths of Indian wisdom.

Vice-Chancellor Prof GSR Krishna Murthy pointed out that NSU's proposal was chosen among 250 nationwide applications and envisioned the centre as a hub for pioneering research into India's scientific and technological traditions.

Academic Dean Prof Rajinikanth Shukla, IKS Centre National Coordinator Ganti Suryanarayana Murthy and Registrar K Venkata Narayana Rao also spoke on the occasion. Faculty members including Prof Shivaram Bhatt, Coordinator of the IKS Centre, and Dr Kumar Bagewadi along with other faculty members also participated in the programme.

26/09/2025 TIRUPATI Pg 03

THE HINDU

SUBSCRIBE



NSU Chancellor and former Chief Election Commissioner N. Gopalaswamy inaugurating the Indian Knowledge Systems Centre at the campus in Tirupati on Thursday. Vice-Chancellor G.S.R. Krishnamurthi can also be seen. | Photo Credit: HANDOUT

A new Indian Knowledge Systems (IKS) Centre, sanctioned by Bharatiya Gyana Parampara, functioning under the Union Ministry of Education, was inaugurated at National Sanskrit University (NSU) campus here on Thursday. The centre is one of the eight sanctioned to prestigious universities and reputed institutes across India.

# Inauguration of the new IKS Centre at the National Sanskrit University





**(Capital Information)**

**Tirupati,** Sep 25 : A new Indian Knowledge System Centre has been established at the National Sanskrit University, Tirupati, which was sanctioned by the Bharatiya Gyana Parampara, Division, New Delhi, under Minister of Education.

The Chancellor of the University, Needamangalam Gopalaswamy, the Vice-Chancellor of the University Prof. G.S.R. Krishnamurthy and the Padma shree awardee, Madugula Naghaphani Sharma, The inauguration was held along with IKS Division, New Delhi National Coordinator Ganti Suryanarayana Murthy, Academic Dean Prof. Rajinikanth Shukla, Registrar K.Venkatanarayana Rao.

Chancellors Speech: Later, a conference organized at the Annarao Sabha Bhavan of the university, Kuladhipathi Gopalaswamy said that it is very gratifying to set up an IKS center in the university. We want to bring out the knowledge, science and scientific aspects of Sanskrit, especially through this IKS center. And provide the knowledge in Sanskrit to everyone in the world. Similarly, this IKS center should be a destination for foreigners to come to this university and study knowledge of Sanskrit. In the inaugural address, it was urged to move forward with a plan on what goals to achieve through the IKS Center in the next five years. He congratulated the authorities and faculty members of the university on this auspicious occasion.Later, distinguished Brahmashri Sahasravadhani, Padma Shri awardee Madugula Naghaphanisharma spoke. He suggested that mindfulness is a unique element in the Indian tradition of knowledge, that the art of mindfulness enhances memory and talent in students, and that everyone should move forward by learning about the many scientific and psychological aspects of the Indian tradition of knowledge.

Afterwards, the Vice-Chancellor of the University, Prof. G.S.R. Krishnamurthy, spoke and said that many centers have been set up in India by the IPS Division, But this year, out of the 250 applications, proposals like those sent by the National Sanskrit University stood out. The IKS Division, Minister of Education, Delhi, expressed its delight at the approval and establishment of an IKS center at the university. He suggested moving forward by encouraging research, especially on scientific and technological topics, through IKS. He congratulated to all faculty.

Later, Academic Dean Prof. Rajinikanth Shukla spoke and explained the main objectives of the IKS Center. Later, IKS Division, New Delhi National Coordinator, Mr. Ganti Suryanarayanamurthy, said that it is essential to set up an IKS center in the university, which will help uncover the Indian heritage of knowledge in the Sanskrit language. Registrar Sri Kadiyam Venkata Narayana Rao participated in the program and given best wishes to all.

This program was well organized by the Coordinator of the IKS Center Prof. Shivaram Bhatt, Head of the Research and Publication Department and the Additional Coordinator, Dr. Kumar Bagewadi Math Education Department, Assistant Professor successfully organized the program. Deans, department heads, faculty and students of various schools participated in this program and made the program a success.

సూర్య

www.suryaa.com

26 Sep 2025 - Page 7

# జ్ఞానానికి గమ్య స్థానం ఐకేఎస్ కేంద్రం

## – జాతీయ సంస్కృతి వర్సిటీలో ఐకేఎస్ కేంద్ర ప్రారంభం



**తిరుపతి ఎడ్యుకేషన్, మేజర్ న్యూస్:** ప్రపంచానికి జ్ఞానాన్ని అందించే కేంద్రంగా ఇండియన్ నాలెడ్జ్ సెంటర్ (ఐకేఎస్) ప్రారంభించడం శుభపరిణామమని ఎన్ఎస్యూ ఛాన్సలర్ ప్రొఫెసర్ నీడామంగళం గోపాలస్వామి పేర్కొన్నారు. జాతీయ సంస్కృత వర్సిటీలో ఆయన అతిథులు, వర్సిటీ అధికారులతో కలసి ఐకేఎస్ కేంద్రాన్ని గురువారం లాంఛనంగా ప్రారంభించారు. ఈ సందర్భంగా ఆయన మాట్లాడుతూ ప్రపంచానికి జ్ఞాన, విజ్ఞాన, వైజ్ఞానికి అంశాలను అందించడమే ఐకేఎస్ లక్ష్యం కావాలని పిలుపునిచ్చారు. విదేశీయులకు సైతం వర్సిటీలోని ఐకేఎస్ కేంద్రం జ్ఞానానికి గమ్య స్థానం కావాలని ఆకాంక్షించారు. అనంతరం బ్రహ్మశ్రీ సహస్రావధాని, పద్మశ్రీ మాడుగుల నాగఫణిశర్మ మాట్లాడుతూ భారతీయ జ్ఞానపరంపరలో విశిష్ట పర్వం అవధానమని, అవధాన కళా విద్యార్థుల్లో స్మృతి శక్తిని, ప్రతిభాశక్తిని వర్ధింపచేస్తుందని చెప్పారు. ప్రతి ఒక్కరు భారతీయ జ్ఞాన పరంపరంలోని అనేక వైజ్ఞానిక మనోవైజ్ఞానిక అంశాలపై అవగాహన పెంచుకోవాలని సూచించారు. వీసీ జీఎస్ఆర్ కృష్ణమూర్తి, రిజిస్ట్రార్ వెంకటనారాయణరావు, న్యూఢిల్లీ జాతీయ కోఆర్డినేటర్ గంటి సూర్యనారాయణ మూర్తి, డీన్లు రజనీకాంత్, దక్షిణమూర్తి శర్మ, ప్రొఫెసర్ శివ రామభట్, పీఆర్ఓ ప్రొఫెసర్ రమేష్‌బాబు, అధ్యాపకులు, విద్యార్థులు పాల్గొన్నారు.

ABN ఆంధ్రజ్యోతి

# భారతీయ జ్ఞాన పరంపరను కాపాడుకోవాలి

**● సంస్కృత వర్సిటీ ఛాన్సలర్ గోపాలస్వామి**



ఐకేఎస్ కేంద్రాన్ని ప్రారంభిస్తున్న ఛాన్సలర్ గోపాలస్వామి

తిరుపతి(విశ్వవిద్యాలయాలు), సెప్టెంబరు 25 (ఆంధ్రజ్యోతి): భారతీయ జ్ఞాన పరంపరను కాపాడుకోవాలని జాతీయ సంస్కృత యూనివర్సిటీ ఛాన్సలర్ ఎన్. గోపాలస్వామి పేర్కొన్నారు. సంస్కృత యూనివర్సిటీలో ఇండియన్ నాలెడ్జ్ సిస్టం (ఐకేఎస్) కేంద్రాన్ని గురువారం ఆయన ప్రారంభించారు. గోపాలస్వామి మాట్లాడుతూ యూనివర్సిటీలో ఐకేఎస్ కేంద్రం ఏర్పాటు మంచి పరిణామమని తెలిపారు. సంస్కృతంలోని ఎన్నో విజ్ఞానదాయక అంశాలను ఈ కేంద్రం ద్వారా వెలుగులోకి తీసుకురావాలని కోరారు. పద్మశ్రీ అవార్డు గ్రహీత మాడగుల నాగఫణిశర్మ మాట్లాడుతూ అవధాన కళ విద్యార్థుల్లో జ్ఞాపకశక్తిని పెంచుతుందన్నారు. దాని గురించి ఈ తరం తెలుసుకోవాలని కోరారు. ఐకేఎస్ కేంద్రం ఏర్పాటు చేసిన ప్రభుత్వానికి వీసీ కృష్ణమూర్తి ధన్యవాదాలు తెలిపారు. ఐకేఎస్ నేషనల్ కోఆర్డినేటర్ సూర్యనారాయణమూర్తి, రిజిస్ట్రార్ వెంకటనారాయణరావు,

26/09/2025 | TIRUPATI(TIRUPATI MAIN) | Page : 5
Source : https://epaper.andhrajyothy.com

స్థానికం / సాక్షి

# జ్ఞానానికి గమ్యస్థానం ఐకేఎస్ కేంద్రం

**● ఎన్ఎస్‌యూలో ఐకేఎస్ కేంద్ర ప్రారంభం**



**ఐకేఎస్ సెంటర్ ప్రారంభోత్సవంలో అతిథులు**

**తిరుపతి సిటీ:** ప్రపంచానికి జ్ఞానాన్ని అందించే కేంద్రంగా ఇండియన్ నాలెడ్జ్ సెంటర్ (ఐకేఎస్) ప్రారంభించడం శుభపరిణామమని ఎన్ఎస్‌యూ చాన్సలర్ ప్రొఫెసర్ నీడా మంగళం గోపాలస్వామి పేర్కొన్నారు. జాతీయ సంస్కృత వర్సిటీలో అతిథులు, వర్సిటీ అధికారులతో కలసి ఆయన ఐకేఎస్ కేంద్రాన్ని గురువారం లాంఛనంగా ప్రారంభించారు. ఈ సందర్భంగా ఆయన మాట్లాడుతూ ప్రపంచానికి విజ్ఞాన, వైజ్ఞానికి అంశాలను అందించడమే ఐకేఎస్ లక్ష్యం కావాలని పిలుపునిచ్చారు. విదేశీయులకు సైతం వర్సిటీలోని ఐకేఎస్ కేంద్రం జ్ఞానానికి గమ్యస్థానం కావాలని ఆకాంక్షించారు. అనంతరం బ్రహ్మశ్రీ సహస్రావధాని, పద్మశ్రీ మాడుగుల నాగఫణిశర్మ మాట్లాడుతూ భారతీయ జ్ఞానపరంపరలో విశిష్ట పర్వం అవధానమని, అవధాన కళ విద్యార్థుల్లో స్మృతి శక్తిని, ప్రతిభాశక్తిని వర్ధింపజేస్తుందని చెప్పారు. ప్రతి ఒక్కరూ భారతీయ జ్ఞాన పరంపరంలోని అనేక వైజ్ఞానిక, మనోవైజ్ఞానిక అంశాలపై అవగాహన పెంచుకోవాలని సూచించారు. వీసీ జీఎస్ఆర్ కృష్ణమూర్తి, రిజిస్ట్రార్ వెంకటనారాయణరావు, న్యూఢిల్లీ జాతీయ కోఆర్డినేటర్ గంటి సూర్యనారాయణమూర్తి, డీన్లు రజనీకాంత్, దక్షణమూర్తి శర్మ, ప్రొఫెసర్ శివ రామ భట్, పీఆర్‌ఓ ప్రొఫెసర్ రమేష్ బాబు తదితరులు పాల్గొన్నారు.

వార్త

26 Sep 2025 - Page 4

# ఎన్ ఎస్ యూలో ఐకేఎస్ కేంద్రం ప్రారంభం

తిరుపతి విద్య, సెప్టెంబర్ 25 ప్రభాతవార్త: ప్రపంచానికి జ్ఞానాన్ని అందించే కేంద్రంగా ఇండియన్ నాలెడ్జ్ సెంటర్ (ఐకేఎస్) ప్రారంభించడం శుభపరిణా మమని ఎన్ఎస్ యూ ఛాన్సలర్ ప్రొఫెసర్ నీడామంగళం గోపాలస్వామి పేర్కొన్నారు. జాతీయ సంస్కృత వర్సిటీలో ఆయన అతిథులు, వర్సిటీ అధికారులతో కలసి ఐకేఎస్ కేంద్రాన్ని గురువారం లాంఛనంగా ప్రారంభించారు. ఆయన మాట్లాడుతూ ప్రపంచానికి జ్ఞాన, విజ్ఞాన,వైజ్ఞానికి అంశాలను అందించ డమే ఐకేఎస్ లక్ష్యం కావాలని పిలుపునిచ్చారు. విదేశీయులకు సైతం వర్సి టీ లోని ఐకేఎస్ కేంద్రం జ్ఞానానికి గమ్య స్థానం కావాలని ఆకాంక్షించారు. అనంతరం బ్రహ్మశ్రీ సహస్రావధాని,పద్మశ్రీ మాడుగుల నాగఫణిశర్మ మాట్లాడుతూ భారతీయ జ్ఞానపరంపరలో విశిష్ట పర్వం అవధానమని, అవధాన కళా విద్యార్థుల్లో స్మృతి శక్తిని, ప్రతిభాశక్తిని వర్ధింపచేస్తుందని చెప్పారు. వీసీ జీఎస్ఆర్ కృష్ణమూర్తి, రిజిస్ట్రార్ వెంకటనారాయణరావు, న్యూఢిల్లీ జాతీయ కోఆర్డినేటర్ గంటి సూర్యనారాయణ మూర్తి,డీన్లు రజనీకాంత్,దక్షిణమూర్తి శర్మ, ప్రొఫెసర్ శివ రామభట్,పీఆర్ఓ ప్రొఫెసర్ రమేష్ బాబు,అధ్యాపకులు, విద్యార్థులు పాల్గొన్నారు.

# నూతనంగా ఐ.కె.ఎస్ కేంద్ర ప్రారంభోత్సవం-ముఖ్యఅతిథిగా విచ్చేసిన గౌరవ కులాధిపతి శ్రీ నీడామంగళం గోపాలస్వామి

తిరుపతి రూరల్ యువ దర్శిని ప్రతినిధి

జాతీయ సంస్కృత విశ్వవిద్యాలయం తిరుపతిలో మినిస్టర్ ఆఫ్ ఎడ్యుకేషన్ ప్రధాన అంగత్వంగా ఉన్న భారతీయ జ్ఞాన పరంపర, డివిజన్ న్యూఢిల్లీ ద్వారా విశ్వవిద్యాలయంలో నూతనంగా ఐ.కె.ఎస్ కేంద్రాన్ని ఏర్పాటు చేయడం జరిగింది.విశ్వవిద్యాలయం గౌ.కులాధిపతి శ్రీ నీడామంగళం గోపాలస్వామి, విశ్వవిద్యాలయ కులపతి ప్రొ.జి.ఎస్.ఆర్ కృష్ణమూర్తి మరియు పద్మశ్రీ అవార్డు గ్రహీత శ్రీ మాడుగుల నాగఫణి శర్మ, ఐ.కె.ఎస్ డివిజన్, న్యూఢిల్లీ జాతీయ కోఆర్డినేటర్ శ్రీ గంటి సూర్యనారాయణ మూర్తి, అకాడమిక్ డీన్ ప్రొ.రజనీకాంత్ శుక్ల, రిజిస్ట్రార్ శ్రీ.కె. వెంకటనారాయణరావులతో కలిసి ప్రారంభించడం జరిగినది.అనంతరం విశ్వవిద్యాలయంలోని చెలికాని







అన్నారావు సభా భవనం నందు ఏర్పాటు చేసినటువంటి సదస్సులో కులాధిపతి గోపాలస్వామి మాట్లాడుతూ విశ్వవిద్యాలయంలో ఐ.కె.ఎస్ కేంద్రం ఏర్పాటు చేయడం ఎంతో ఆనందదాయకమని, ప్రత్యేకించి సంస్కృతంలో ఉన్నటువంటి జ్ఞాన- విజ్ఞాన-వైజ్ఞానిక అంశాలను ఈ ఐ.కె.ఎస్ కేంద్రం ద్వారా బయటికి తీసుకొస్తూ, ప్రపంచంలో ఉన్నటువంటి ప్రతి ఒక్కరికి కూడా సంస్కృతంలో ఉన్న జ్ఞానాన్ని అందించాలని, అదేవిధంగా విదేశీయులు కూడా ఈ విశ్వవిద్యాలయానికి వచ్చి జ్ఞానాన్ని అధ్యయనం చేయడానికి ఈ ఐ.కె.ఎస్ కేంద్రం గమ్యస్థానంగా ఉండాలని, వచ్చేటువంటి ఐదు సంవత్సరాలలో ఐ.కె.ఎస్ కేంద్రం ద్వారా ఏమేమి లక్ష్యాలు సాధించాలో అనేటి అంశం పైన ప్రణాళిక కలిగి ముందుకు వెళ్లాలని ఉద్ఘాటన భాషణంలో ఉద్బోధించడం జరిగింది. ఈ శుభ సందర్భంగా విశ్వవిద్యాలయంలో ఉన్న అధికార, అధ్యాపక గణానికి అభినందనలు తెలియజేశారు.అనంతరం విశిష్టాథితి బ్రహ్మశ్రీ సహస్రావధాని, పద్మశ్రీ శ్రీ మాడుగుల నాగఫణిశర్మ మాట్లాడుతూ భారతీయ జ్ఞానపరంపరలో విశిష్ట అంగం అవధానమని, అవధాన కళా విద్యార్థుల్లో స్మృతిశక్తిని, ప్రతిభాశక్తిని వర్ధింపచేస్తుందని, ప్రతి ఒక్కరు భారతీయ జ్ఞాన పరంపరంలో ఉన్నటువంటి అనేక వైజ్ఞానిక మనోవైజ్ఞానిక అంశాలు తెలుసుకుని ముందుకు సాగాలని సూచించారు.అనంతరం సభాధ్యక్షులు విశ్వవిద్యాలయం ఉపకులపతి ప్రొ.జి.ఎస్.ఆర్ కృష్ణమూర్తి మాట్లాడుతూ ఐకెఎస్ డివిజన్ ద్వారా చాలా కేంద్రాలను భారతదేశంలో ఏర్పాటు చేయడం జరిగిందని,కానీ ఈ సంవత్సరం 250 అప్లికేషన్స్ లో ప్రత్యేకించి జాతీయ సంస్కృత విశ్వవిద్యాలయం తరఫున పంపినటువంటి ప్రపోజల్ను ఐ.కె.ఎస్ డివిజన్, మినిస్టర్ ఆఫ్ ఎడ్యుకేషన్, ఢిల్లీ వారు ఆమోదించి విశ్వవిద్యాలయానికి ఐ.కె.ఎస్ కేంద్రాన్ని ఏర్పాటు చేయడం ఎంతో హర్షణీయమని తెలియజేశారు. ఐ.కె.ఎస్. ద్వారా ప్రత్యేకించి వైజ్ఞానిక, సాంకేతిక అంశాలపైన పరిశోధనలను ప్రోత్సహిస్తూ ముందుకు సాగాలని సూచించారు.అనంతరం ఐ.కె.ఎస్ డివిజన్, న్యూఢిల్లీ జాతీయ కోఆర్డినేటర్ శ్రీ.గంటి సూర్యనారాయణమూర్తి మాట్లాడుతూ విశ్వవిద్యాలయంలో ఐ.కె.ఎస్ కేంద్రం ఏర్పాటు చేయడం ఆవశ్యకమని తద్వారా సంస్కృత భాషలో ఉన్న భారతీయ జ్ఞాన పరంపరను వెలికి తీయడం వీలవుతుందని తెలియజేశారు. అనంతరం అకడమిక్ డీన్ ప్రొ.రజనీకాంత్ శుక్ల మాట్లాడుతూ ఐ.కె.ఎస్ కేంద్ర ముఖ్య లక్ష్యాలను వివరించారు. రిజిస్ట్రార్ శ్రీ కడియం వెంకట నారాయణరావు కార్యక్రమంలో పాల్గొన్నారు.ఈ కార్యక్రమంతటిని కూడా విద్యాలయం ఐ.కె.ఎస్ కేంద్రం కోఆర్డినేటర్ రీసెర్చ్ అండ్ పబ్లికేషన్ విభాగ అధ్యక్షులు ప్రొ. శివరామభట్ మరియు అడిషనల్ కోఆర్డినేటర్ ఎడ్యుకేషన్ విభాగం సహాయకాచార్యులు డా.కుమార్ బాగేవాడి మఠ్ కార్యక్రమాన్ని దిగ్విజయంగా నిర్వహించడం జరిగింది. ఈ కార్యక్రమంలో వివిధ స్కూల్స్ డీన్స్, విభాగ అధ్యక్షులు, అధ్యాపకులు, విద్యార్థులు పాల్గొని కార్యక్రమం జయప్రదం చేయడం జరిగింది.

सहसंयोजकः — संयोजकः

**डा.कुमारः बागेवाडिमठः** — **आचार्यः शिवरामभट्टः**